सैनिकानामशस्त्राणि स्फुरन्त्यङ्गानि यत्र च ।
दुःस्वप्नान्यपि पश्यन्ति बलन्तदभियोजयेत् ॥
उत्साहबलसम्पन्नश्चानुरक्तबलस्तथा ।
तुष्टपुष्टबलो राजा परानभिमुखो व्रजेत् ॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥
ऋक्षेषु षट्सु शुद्धेषु ग्रहेष्वनुगुणेषु च ।
प्रश्नकाले शुभे जाते परान् यायान्नराधिपः ॥
एवन्तु दैवसम्पन्नस्तथा पौरुषसंयुतः ।
देशकालोपपन्नान्तु यात्रां यायान्नराधिपः ॥
उलूकस्य निशि ध्वाङ्क्षः स च तस्य दिवा वशी ।
एवं देशञ्च कालञ्च ज्ञात्वा यात्रां प्रयोजयेत् ॥
पदातिनागबहुलां सेनां प्रावृषि योजयेत् ।
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ॥
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिपः ।
चतुरङ्गबलोपेतां वसन्ते वा शरद्यथ ॥
सेना पदातिबहुला यस्य स्यात् पृथिवीपतेः ।
अभियोज्यो भवेत्तेन शत्रुर्विषममाश्रितः ॥
गम्ये वृक्षावृते देशे स्थितं शत्रुं तथैव च ।
किञ्चित्पङ्के तथा यायाद्बहुनागो नराधिपः ॥
रथाश्वबहुलो यायात् शत्रुं समपथाश्रितम् ।
तदाश्रयन्तो बहुलास्तथा राजाभिपूजयेत् ॥
खरोष्ट्रबहुलो राजा शत्रुं बन्धनसंस्थितम् ।
बन्धनस्थोऽपि योज्योऽरिस्तदा प्रावृषि भूभुजा ॥
हिमपातयुते देशे स्थितं ग्रीष्मेऽभियोजयेत् ।
शरद्वसन्तौ धर्म्मज्ञ कालौ साधारणौ स्मृतौ ॥

विज्ञाय राजा हिजदेशकालौ
दैवं त्रिकालञ्च तथैव बुद्धा ।
प्रायात् परं कालविदां मतेन
सञ्चिन्त्य सार्द्धं द्विजमन्त्रविद्भिः ॥"

इति मात्स्ये २१४ अध्यायः ॥ * ॥

यात्राकाले माङ्गल्यद्रव्याणि यथा,—
"पौर्व्वापर्य्यं स्ववृत्तान्तं ताशुक्रा च शुभक्षणे ।
तैरेव सार्द्धं बलवान् बभूव गमनोन्मुखः ॥
ददर्श मङ्गलं रामः शुश्राव जयसूचकम् ।
बुबुधे मनसा सर्व्वं विजयं वैरिसंक्षयम् ॥
यात्राकाले च पुरतः शुश्राव सहसा मुनिः ।
हरिशब्दं शङ्खरवं घण्टादुन्दुभिवादनम् ॥
आकाशवाणीं सङ्गीतां जयस्ते भवितेति च ।
नरोक्तं तच्च कल्याणं मेघशब्दं जयावहम् ॥
चकार यात्रां भगवान् दृष्ट्वैवंविधं शुभम् ।
ददर्श पुरतो विप्रवन्दिदैवज्ञभिक्षुकान् ॥
जलत्प्रदीपं बिभ्रन्तीं पतिपुत्रवतीं सतीम् ।
पुरो ददर्श स्मेरास्यां नानाभूषणभूषिताम् ॥
शिवं शिवां पूर्णकुम्भं चाषञ्च नकुलन्तथा ।
गच्छन् ददर्श रामेशो यात्रामङ्गलसूचकम् ॥
छायासारं गजं सिंहं तुरगं गण्डकं दिपम् ।
चमरीं राजहंसञ्च चक्रवाकं शुकं पिकम् ॥
मयूरं खञ्जनञ्चैव शङ्खचिल्लचकोरकम् ।
पारावतं बलाकाञ्च कारण्डं चातकं चटम् ॥
सौदामिनीं शक्रचापं सूर्य्यं सूर्य्यसभां शुभाम् ।
सद्योमांसं सजीवञ्च मत्स्यं शङ्खं सुवर्णकम् ॥
माणिक्यं रजतं मुक्तां मणीन्द्रञ्च प्रवालकम् ।
दधि लाजं शुक्लधान्यं शुक्लपुष्पञ्च कुङ्कुमम् ॥
शुक्लच्छत्रं पताकाञ्च दर्पणं श्वेतचामरम् ।
धेनुं वत्सप्रयुक्ताञ्च रथस्थं भूमिपं तथा ॥
दुग्धञ्च रोचनामाज्यमन्नं पायसं तथा ।
शालग्रामं पक्वफलं स्वस्तिकं शर्करां मधु ॥
मार्ज्जारञ्च वृषेन्द्रञ्च मेघपर्व्वतमूर्द्धगकम् ।
मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम् ॥
कस्तूरीं कज्जलं तोयं हरिद्रां तीर्थमृत्तिकाम् ।
सिद्धार्थं सर्षपं दूर्व्वां विप्रबालञ्च बालिकाम् ॥
मृगं वेश्याञ्च भ्रमरं कर्पूरं पीतवाससम् ।
गोमूत्रं गोपुरीषञ्च गोधूलिं गोपदाङ्कितम् ॥
गोष्ठं गवां वर्त्म रम्यं गोशालं गोरतिं शुभाम् ।
भूषणं देवप्रतिमां ज्वलदग्निं महोत्सवम् ॥
ताम्रं स्फटिकं रैत्यञ्च सिन्दूरं माल्यचन्दनम् ।
गन्धञ्च हीरकं रत्नं ददर्श दक्षिणे शुभम् ॥
सुगन्धि वायोराघ्राणं प्राप विप्राशिषं शुभम् ।
इत्येवं मङ्गलं ज्ञात्वा प्रययौ स मुदान्वितः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३३ अध्यायः ॥ * ॥

यात्राकाले अमङ्गलसूचकानि यथा,—
"राजा जगाम समरं हृदयेन विदूयता ।
सार्द्धं सैन्यसमूहैश्च वाद्यभाण्डैरसंख्यकैः ॥
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ।
ययौ तथापि समरं न जगाम गृहं पुनः ॥
मुक्तकेशीं छिन्ननासां रुदन्तीञ्च दिगम्बरीम् ।
कृष्णवस्त्रपरीधानामपरां विधवामपि ॥
सुखदुष्टां योनिदुष्टां व्याधियुक्ताञ्च कुट्टनीम् ।
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो ॥
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ।
कुचैलमपि रूक्षाङ्गं नग्नं काषायवासिनम् ॥
वत्सविक्रयिणञ्चैव कन्याविक्रयिणं तथा ।
चितां दग्धशवं भस्म निर्व्वाणाङ्गारमेव च ॥
सर्पघ्नतनरं सर्पं गोधाञ्च शशकं विषम् ।
श्राद्धपाकञ्च पिण्डञ्च मोदकञ्च तिलांस्तथा ॥
देवलं वृषवाहञ्च शूद्रश्राद्धान्नभोजिनम् ।
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् ॥
कुशपुत्तलिकाञ्चैव शवदाहनकारिणम् ।
शून्यकुम्भं चूर्णकुम्भं तैलं लवणमस्थि च ॥
कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् ।
दक्षिणे च शृगालाञ्च कुर्व्वन्तं भैरवं रवम् ॥
कपर्द्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् ।
कलहञ्च विलापञ्च विलापकारिणं जनम् ॥
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् ।
मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनम् ॥
पुंश्चलीपतिपुत्रौ च पुंश्चल्योदनभोजिनम् ।
देवतागुरुविप्राणां वस्तुवित्तापहारिणम् ॥
दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् ।
पितृमातृविरक्तञ्च द्विजाश्वत्थविघातिनम् ॥
सत्यघ्नञ्च कृतघ्नञ्च स्थाप्यापहारिणं जनम् ।
मित्रद्रुहं मित्रघ्नञ्च शठं विश्वासघातिनम् ॥
गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकम् ।
जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्दयम् ॥
व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकम् ।
गलितव्याधिगात्रञ्च गुरुलङ्घनमेव च ॥
पुक्कसं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा ।
क्षिप्तं वमन्तं रुधिरं महिषं गर्द्दभं तथा ॥
मूत्रं पुरीषं श्लेष्माणं कन्थिनं नृकपालिनम् ।
झञ्झावातं रक्तवृष्टिं वाद्यञ्च गृहपातकम् ॥
वृषञ्च शूकरं गृध्रं श्येनं कङ्कञ्च भल्लुकम् ।
पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा ॥
अग्रदानिब्राह्मणञ्च तन्त्रमन्त्रोपजीविनम् ।
वैद्यञ्च रक्तपुष्पञ्चैवौषधन्तुषमेव च ॥
कुवार्त्तां मृतवार्त्ताञ्च विप्रशापञ्च दारुणम् ।
दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि ॥
मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरम् ।
वामाङ्गस्पन्दनं देहजाद्यं राज्ञो बभूव ह ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

श्रीकृष्णस्य मथुरायात्रा यथा,—
"राधिकायाश्च सुभायां सुभासु गोपिकासु च ।
पुष्पचन्दनतल्पे च वायुना सुरभीकृते ॥
तृतीयप्रहरेऽतीते निशायाञ्च शुभक्षणे ।
शुभचन्द्रर्क्षयोगे चामृतयोगसमन्विते ॥
सौम्यस्वामियुते लग्ने सौम्यग्रहविलोकने ।
पापग्रहसमासक्तदृष्टिदोषादिवर्ज्जिते ॥
यशोदां बोधयामास कारयामास मङ्गलम् ।
बन्धूनाश्वासयामास समुत्थाय हरिः स्वयम् ॥
वाद्यं निषेधयामास राधिकाभयभीतवत् ।
स्वतन्त्रो विश्वकर्त्ता च पाता भर्त्ता स्वतन्त्रवत् ॥
प्रक्षाल्य पादयुगलं धृत्वा धौते च वाससी ।
उवास संस्कृते स्थाने विलिप्ते चन्दनादिना ॥
फलपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः ।
वामे कृत्वा पूर्णकुम्भं वह्निं विप्रं स्वदक्षिणे ।
पतिपुत्रवतीं दीपं दर्पणं पुरतस्तथा ॥
दूर्व्वाकाण्डञ्च सुस्निग्धं पुष्पं धान्यं सितं शुभम् ।
गुरुदत्तं गृहीत्वा च प्रददौ मस्तकोपरि ॥
घृतं ददर्श माध्वीकं रजतं काञ्चनं दधि ।
चन्दनं लेपनं कृत्वा पुष्पमालां गले ददौ ॥
गुरुवर्गं ब्राह्मणञ्च वन्दयामास भक्तितः ।
शङ्खध्वनिं वेदपाठं सङ्गीतं मङ्गलाष्टकम् ॥
विप्राशीर्व्वचनं रम्यं शुश्राव परमादरम् ।
ध्यात्वा मङ्गलरूपञ्च सर्व्वत्र मङ्गलप्रदम् ॥
चिक्षेप दक्षिणं पादं सुन्दरं स्वात्मविग्रहम् ।
विधृत्य नासिकावामभागं मध्यमया विभुः ॥
विरुध्य वायुमिष्टञ्च नासादक्षिणरन्ध्रतः ।
ततो ययौ नन्दनन्दो नन्दस्य प्राङ्गणं वरम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७१ अध्यायः ॥

अथ यात्रायुक्तिः । तत्र समयः ।
"यात्रायां द्विविधः कालो वैकारः सहजस्तथा ।
प्रोक्त आत्ययिके कार्य्ये विकारो नात्र निर्णयः ।
सहजः स्वेच्छया राज्ञां तस्य निर्णय उच्यते ॥
यात्राजसिंहमध्या शनैश्चरबुधोशनसां गृहेषु ।
भानौ कुलीरवृषवृश्चिकगोभिरीर्घां
शस्तस्तु देवलमतेऽध्वनि पृष्ठतोऽर्कः ॥
अश्विनी रेवती ज्येष्ठा तथा पुष्यपुनर्वसू ।